# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College under University of Calcutta)**

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2015**

**FIRST YEAR**

Date : 21/05/2015 **SANSKRIT (Honours)**

Time : 11 am – 3 pm Paper : II Full Marks : 100

1. स्वाभिलाषानुसारं <u>चतुर्षु</u> निम्नरेखाङ्कितेषु स्थलेषु सकारणं विभक्तिर्निर्णेया। [1×4]
   a) गृहीत इव <u>केशेषु</u> b) <u>क्रोधाद्</u> भवति सम्मोहः c) <u>वैकुण्ठमध्यास्ते</u> d) <u>नृसिंहाय</u> नमस्कुर्मः
   e) <u>पत्ये</u> शेते f) <u>रवावस्तं</u> गते गतः g) <u>दुर्भिक्षाय</u> सिता विद्युत्

2. <u>त्रयाणां</u> पदानां व्यासवाक्यैः सह समासनामानि लेख्यानि। [3×1]
   a) अष्टाध्यायी b) प्रत्यहम् c) नरसिंहः
   d) वनेचरः e) विद्यारत्नम् f) राजपथः

3. a) स्वेच्छया <u>द्वयोः</u> स्थलयोः सन्धिः कार्यः। [2×1]
   i) शक + अन्धुः ii) साधू + एतौ iii) शक्तिः + रामे iv) हसन् + आयातः
   b) स्वेप्सया स्थल<u>द्वये</u> सन्धिविच्छेदः कार्यः। [2×1]
   i) रवा उदिते ii) चक्षूरोगः iii) धनुष्टङ्कारः iv) सुबन्तम्

4. निम्नलिखितस्य यस्य कस्यापि वाक्य<u>त्रितयस्या</u>र्थ एकैकेन पदेन प्रकाशनीयः। [1×3]
   a) अग्रामं ग्रामं करोति b) श्रोतुमिच्छति c) शवानां शयनम्
   d) परस्मिन् अहनि e) कुले जातः f) पुनः पुनः नृत्यन्ति

5. स्वाभिलाषानुसारम् अधःस्थितानां <u>त्रयाणां</u> परिणतरूपाणि लेख्यानि। [3×1]
   a) √वस् + क्त्वाच् b) मत्स्य + ङीप् c) वृद्ध + ईयसुन्
   d) √अस् + शतृ e) √कृ + क्त f) बहु + इमनिच्

6. स्वेछया अशुद्धिसंशोधनपूर्वकं वाक्य<u>द्वयं</u> लेख्यम्। [2×1]
   a) अपारा रामचन्द्रस्य महिमा। b) मातृन् प्रणम्य विद्यालयं गच्छ।
   c) ब्राह्मणा ग्रामेऽधिवसन्ति। d) प्रातरद्य वृष्टिरभवत्।

7. स्वाभिप्रायानुसार<u>मेकस्य</u> वाक्यस्य याथार्थ्यं निर्णेयम्। [1×2]
   a) एको वृक्षः पञ्च नौका भवति। b) वदन्त्यपर्णामिति तां पुराविदः। c) व्याघ्राद् भयाद् नराः पलायन्ते।

8. वाक्यरचनया यस्य कस्यापि द्वन्द्व<u>द्वय</u>स्यार्थपार्थक्यं प्रदर्शनीयम्। [2×2]
   a) मित्रः, मित्रम् b) अर्थी, अर्थवान् c) सङ्गच्छति, संगच्छते d) कवरी, कवरा

9. स्वेच्छया कस्या<u>प्येक</u>स्यैव प्रश्नस्योत्तरं प्रदेयम्। [1×10]
   a) स्वप्नवासवदत्तनाटकस्याद्येऽङ्के ब्रह्मचारिवृत्तान्तसन्निवेशेन किमपि प्रयोजनं साध्यते न वेति वैशद्येनालोचनीयम्।
   b) राजनीतिविद्रूपेण अमात्यरूपेण च यौगन्धरायणस्य चरित्रमालोच्यताम्।

10. वङ्गभाषयाङ्गलभाषया वानुवादः कार्यः पद्य<u>स्यैकस्य</u> स्वाभिरुच्यनुसारम्। [1×5]
   a) <u>विस्रब्धं</u> हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
   वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
   भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
   निःसन्दिग्धमिदं तपोवनमयं धूमो हि <u>बह्वाश्रयः</u>।।
   b) कामेनोज्जयिनीं गते <u>मयि</u> तदा कामप्यवस्थां गते
   दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।

तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ।।

11. प्रसङ्गोल्लेखेन स्वाभिमतं पद्य**मेकं** संस्कृतेन व्याख्येयम्। [1×7]

a) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते।।

b) पूर्वं त्वयाप्यभिमतं गतमेवमासी
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।

12. a) सकारणं विभक्तिर्निर्णेया — 10(a) इत्यत्र 'विस्रब्धम्' इत्यस्य, 10(b) इत्यत्र 'मयि' इत्यस्य वा। [1×1]

b) व्यासवाक्येन सह समासनाम लेख्यम् — 10(a) इत्यत्र 'बह्वाश्रयः' इत्यस्य, 10(b) इत्यत्र 'पञ्चेषुः' इत्यस्य वा। [2×1]

13. स्वेच्छया प्रश्न**स्यैकस्य** समाधानं कार्यम्। [1×10]

a) भारवेरर्थगौरवमिति वचनस्य सार्थक्यं निरूपणीयम्।

b) पाठ्यानुसारं दुर्योधनस्य राज्यशासनप्रणाली विशद्यताम्।

14. वङ्गाङ्गलान्यतरभाषयानूद्यतां पद्य**मेकम्**। [1×5]

a) श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः।।

b) भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः।।

15. सप्रसङ्गं पद्य**मेकं** संस्कृतेन व्याख्येयम्। [1×7]

a) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
न्नसंवृताङ्गान् निशिता इवेषवः।।

b) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।।

16. a) सविग्रहवाक्यं समासनाम निर्णेयम् :14(a) इत्यस्मिन् 'वनेचरः' इत्यस्य, 14(b) इत्यस्मिन् 'निरस्तनारीसमयाः' इत्यस्य वा। [2×1]

b) व्युत्पत्तिर्निर्णेया : 14(a) इत्यस्मिन् 'वेदितुम्' इत्यस्य, 14(b) इत्यस्मिन् 'वक्तुम्' इत्यस्य वा। [1×1]

17. स्वाभिमत**स्यैकस्यैव** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

a) अभिज्ञानशाकुन्तले हंसपदिकागीतं सोपयोगं न वेति वैशद्येन विचार्यताम्।

b) शाकुन्तले दुर्वाससः शापः किंप्रयोजनक इति सविस्तरमालोचनीयम्।

18. वङ्गभाषयाङ्गलभाषया वानूद्यतां स्वाभिलषितं पद्य**मेकम्**। [1×5]

a) उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रम–
स्तव प्रसादस्य पुरस्तु सम्पदः।।

b) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

19. यथाभिमतं पद्य**मेकं** संस्कृतेन व्याख्यायताम्। [1×6]

a) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि।।

b) भवन्ति नम्रास्तरवः फलागमै–
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।

20. अधस्तात् प्रदत्तस्य यस्य कस्या**प्येकस्य** संस्कृतरूपं लेख्यम्। [1×4]

a) णूणं मे सुअरिअप्पडिबन्धअं पुराकिदं तेसु दिअहेसु परिणाममुहं आसी जेण साणुक्कोसो बि अज्जउत्तो मइ विरसो संवुत्तो। अह कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ?

b) शहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकम्पामिदुए बि शोत्तिए।।

—————— × ——————